उदा → १. लिखसि २. ..............

३. .............. ४. ..............

५. .............. ६. ..............

७. .............. ८. ..............

९. .............. १०. ..............

११. .............. १२. ..............

१३. .............. १४. ..............

१५. .............. १६. ..............

©KTBS Not to be republished

# क्रियाकलापः

## VII. स्वयं पञ्चवाक्यानि रचयत।

उदा बालकः किं करोति?
बालकः क्षीरं पिबति।
बालकः शालां गच्छति इत्यादीनि

१. माता किं करोति?

उ. ..........................................

..........................................

..........................................

..........................................

..........................................

२) अध्यापकः किं करोति?

उ. ..........................................

..........................................

..........................................

..........................................

..........................................

३) भवान्/ भवती किं करोति ?

उ. ..........................................

..........................................

..........................................

..........................................

..........................................

⌘⌘⌘⌘⌘⌘

©KTBS Not to be republished

सप्तदशः पाठः

# सुभाषितानि

**(कण्ठपाठः करणीयः)**

1. उदये सविता रक्तः रक्तश्चास्तमये तथा।
   सम्पत्तौ च विपत्तौ च महतामेकरूपता।।

2. यथा चित्तं तथा वाचः यथा वाचस्तथा क्रियाः।
   चित्ते वाचि क्रियायां च साधूनामेकरूपता।।

3. वज्रादपि कठोराणि मृदूनि कुसुमादपि।
   लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।।

4. अधमा धनमिच्छन्ति धनमानौ तु मध्यमाः।
   उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।।

5. शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
   साधवो न हि सर्वत्र चन्दनं न वने वने।।

6. सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः।
   सत्यमेवाक्षया वेदाः सत्येनैवाप्यते परम्।।

©KTBS Not to be republished

## सुभाषितानाम् अर्थाः

1) सूर्यः उदयकाले अस्तमयकाले च रक्तवर्णः एव भवति। एवमेव सम्पत्काले आपत्काले च महापुरुषाः समानाः तिष्ठन्ति।

2) येन प्रकारेण चितं (मनः) भवति तदनुसारेण सम्भाषणानि वर्तन्ते। यथा सम्भाषणानि भवन्ति तदनुसारं कार्याणि भवन्ति। मानसे सम्भाषणे च महात्मानः समानरूपिणः भवन्ति।

3) लोके उत्तमानां मनः वज्रात् अपि कठोरं भवति। क्वचित् कुसुमात् अपि मृदु भवति। अतः महात्मनां चित्तं ज्ञातुं को हि समर्थः भवति?

4) नीचाः धनम् इच्छन्ति। मध्यमाः तु धनं गौरवं च इच्छन्ति। उत्तमाः गौरवम् एव इच्छन्ति। मानः एव महात्मनां धनं भवति।

5) सर्वेषु शैलेषु माणिक्यं न भवति। सर्वेषु गजेषु मौक्तिकं न भवति। सर्वेषु वनेषु चन्दनवृक्षः न भवति। एवं सज्जनाः सर्वत्र न भवन्ति।

6) सत्यमिति एकपदमेव ब्रह्म। सत्ये एव धर्मः निहितो भवति। सत्यमेव नाशरहिताः वेदाः। सत्यमार्गेणैव मोक्षः प्राप्यते।

©KTBS Not to be republished

## अभ्यासः

## I. एकवाक्येन उत्तरं लिखत।

1) सविता कदा रक्तवर्णः भवति ?

उ. ....................................................................

2) लोकोत्तराणां चेतांसि कस्मादपि कठोराणि भवन्ति ?

उ. ....................................................................

3) महतां धनं किम् ?

उ. ....................................................................

4) केषां दर्शनं पुण्यं भवति ?

उ. ....................................................................

5) कस्य समागमः सद्यः फलति ?

उ. ....................................................................

## II. संयोज्य लिखत।

| अ | आ | उत्तराणि |
|---|---|---|
| 1) शशी | 1) दैन्यम् | ....................... |
| 2) कल्पतरुः | 2) मौक्तिकम् | ....................... |
| 3) गजः | 3) तापम् | ....................... |

©KTBS Not to be republished

## III. विरुद्धार्थकं पदं लिखत।

1) साधुः x [ ]

2) मृदु x [ ]

3) उत्तमाः x [ ]

## IV. चतुर्थपदं लिखत।

1) वज्रम्ः कठोरम् :: कुसुमम् : .......................।

2) शैले : माणिक्यम् :: वने : .......................।

3) उत्तमाः मानम् :: अधमाः : .......................।

## V. पर्यायपदं लिखत।

1) सविता = [ ]

2) चित्तम् = [ ]

3) शशी = [ ]

4) शैलः = [ ]

5) गजः = [ ]

©KTBS Not to be republished

### अष्टादशः पाठः

# संङ्ख्याः

**एकम् 1**



एकं हृदयम्



एकं मस्तिष्कम्



एकम् उदरम्

**द्वे 2**



द्वे नेत्रे



द्वौ हस्तौ



द्वौ कर्णौ



द्वौ पादौ

**त्रीणि 3**



नारिकेलस्य नेत्राणि त्रीणि



बिल्वपत्राणि त्रीणि



शिवस्य नेत्राणि त्रीणि

**चत्वारि 4**



चतुर्वेदाः



चतुर्मुखब्रह्मा




चतुर्मुखसिंहः

©KTBS
Not to be republished

**पञ्च 5**

## पञ्चमहाभूतानि

| | | | | |
|---|---|---|---|---|
|  |  |  |  |  |
| जलम् | वायुः | भूमिः | अग्निः | आकाशः |

**षट् 6**

## षड्दोषाः हातव्याः

- निद्रा
- तन्द्रा
- भयम्
- क्रोधः
- आलस्यम्
- दीर्घसूत्रता

## षड्-रसाः

- मधुरम्
- तिक्तम्
- कटुः
- आम्लः
- कशायः
- लवणम्

**सप्त 7 सप्त-ऋषयः**

| | | | | | | |
|---|---|---|---|---|---|---|
|  |  |  |  |  |  |  |
| वसिष्ठः | भरद्वाजः | विश्वामित्रः | गौतमः | अत्रिः | अगस्त्यः | जमदग्निः |

©KTBS Not to be republished

## अष्टदिशः




©KTBS Not to be republished

## नव 9 नव धान्यानि




### दश 10 दश-अवताराः




©KTBS
Not to be republished

**अवधेयांशा:**

मत्स्यकूर्मो वराहश्च नृसिंहो वामनस्तथा।
रामोरामश्च कृष्णश्च बुद्धकल्की तथा दश।।

## सङ्ख्या:

**उच्चैः पठत - अवगच्छत - रिक्तस्थानेषु लिखत च।**

| | | | |
|---|---|---|---|
| 1 | १ | एकम् | ………………… |
| 2 | २ | द्वे | ………………… |
| 3 | ३ | त्रीणि | ………………… |
| 4 | ४ | चत्वारि | ………………… |
| 5 | ५ | पञ्च | ………………… |
| 6 | ६ | षट् | ………………… |
| 7 | ७ | सप्त | ………………… |
| 8 | ८ | अष्ट | ………………… |
| 9 | ९ | नव | ………………… |
| 10 | १० | दश | ………………… |
| 11 | ११ | एकादश | ………………… |
| 12 | १२ | द्वादश | ………………… |
| 13 | १३ | त्रयोदश | ………………… |
| 14 | १४ | चतुर्दश | ………………… |

©KTBS Not to be republished

| | | | |
|---|---|---|---|
| 15 | १५ | पञ्चदश | ................... |
| 16 | १६ | षोडश | ................... |
| 17 | १७ | सप्तदश | ................... |
| 18 | १८ | अष्टादश | ................... |
| 19 | १९ | नवदश | ................... |
| 20 | २० | विंशतिः | ................... |

## अभ्यासः

### I. उदाहरणानुसारं लिखत।

उदा → दश = 10

षोडश = ..............

पञ्चदश = ..............

चतुर्दश = ..............

विंशतिः = ..............

एकम् = ..............

द्वादश = ..............

.............. = 19

.............. = 18

.............. = 17

.............. = 12

### II. आवरणस्थां सङ्ख्यां दृष्ट्वा रिक्तं स्थानं पूरयत।

१. .............. ब्रह्मा (१)।

२. .............. नेत्रे (२)।

३. .............. वचनानि (३)।

४. .............. पाण्डवाः (५)।

५. .............. ऋतवः (६)

६. .............. वासराः (७)

७. .............. अवताराः (१०)।

८. .............. रुद्राः (११)।

९. .............. मासाः (१२)।

१०. ........... संस्काराः (१६)।

©KTBS Not to be republished

## समयः


एकवादनम् - १.००


द्विवादनम् - २.००


पञ्चवादनम् - ५.००


सपादषड्वादनम् ६.१५


सार्धसप्तवादनम् - ७.३०


पादोन अष्टवादनम् - ७.४५


दशाधिकनववादनम् - ९.१०


दशोन द्वादशवादनम् - ११.५०

## अभ्यासः

**कः समयः ?** **उदा → 3.30 सार्ध त्रिवादनम्**

२.३० = ....................   १.३० = ....................

४.१० = ....................   ३.५० = ....................

८.४५ = ....................   ५.३० = ....................

१०.०० = ....................   १२.३० = ....................

**भाषाभ्यासः** 1) समयस्य महत्त्वं जानीत। 2) दिनचर्यां लिखत।

©KTBS Not to be republished

एकोनविंशः पाठः

# महावीराचार्यः

सर्वेषु विषयेषु गणितं प्रमुखम्। प्रातःकालतः रात्रिपर्यन्तं कदा इति समयगणना, कियत् इति मौल्यगणना, कति इति संख्यागणना, सदा भवति एव । गणितं विना जीवनं नास्ति । जगति गणितक्षेत्रे भारतीयगणितज्ञानां योगदानं प्रमुखम् अस्ति । तेषु गणितज्ञेषु कर्णाटकस्य महावीराचार्यः अन्यतमः।

महावीराचार्यः गुल्बर्गाप्रान्तस्य राष्ट्रकूटवंशस्य अमोघवर्षनृपतुंगस्य आस्थाने नवमशताब्धौ (815-878) आसीत् । जैनमतस्थः एषः आचार्यः गणितसारसंग्रहः इति प्रसिद्धस्य ग्रन्थस्य रचयिता अस्ति। ग्रन्थे नव अध्यायेषु 1100 श्लोकाः सन्ति । विविधाः आकर्षकाः गणितसमस्याः श्लोकरूपेण सन्ति । गणितज्ञस्य मेधाशक्तिः, कवेः कल्पनाशक्तिः, कलाकारस्य सृजनशक्तिः एवं त्रयाणां संगमः महावीराचार्यः इति पण्डिताः वदन्ति । पद्यरूपेण कल्पनाशक्तिद्वारा गणितविषयस्य बोधनं तस्य विशेषता आसीत् । राजमहेन्द्रिप्रान्तस्य पावलूरि मल्लणः इति गणितज्ञः गणितसारसंग्रहः इति ग्रन्थस्य अनुवादं तेलुगुभाषायाम् अकरोत् । अग्रे चेन्नै प्रान्तस्य संस्कृतस्य प्राध्यापकः राव् बहद्दूर् एम्. रंगाचार्यः संस्कृतप्राध्यापकः क्रि.श. 1912 तमे वर्षे आंग्लभाषायाम् अनुवादम् अकरोत् । अधुना कन्नडे, हिन्दी भाषायामपि एषः ग्रन्थः अनूदितः अस्ति ।

मालारूपगणितम्

| | | | | |
|---|---|---|---|---|
| १३९ | x | १०९ | = | १५१५१ |
| ११०११०११ | x | ९१ | = | १००२००२००१ |
| १५२२०७ | x | ७३ | = | ११११११११ |
| १४२८७१४३ | x | ७ | = | १०००१०००१ |

©KTBS Not to be republished

| | | | | |
|---|---|---|---|---|
| १४२८५७१४३ | x | ७ | = | १००००००००१ |
| ३३३३३३६६६६६७ | x | ३३ | = | ११००००११००००११ |
| १२३४५६७१ | x | ९ | = | १११११११११ |
| २७९९४६८१ | x | ४४१ | = | १२३४५६५४३२१ |

दक्षिणतः वामभागं अथवा वामतः दक्षिणभागं पठामः चेत् एकरूपसंख्या एव भवति । सा संख्या मालारूपसंख्या । एवं बहूनि उदाहरणानि गणितसारसङ्ग्रहे सन्ति ।

संख्याज्ञानप्रदीपेन जैनेन्द्रेण महर्षिणा ।
प्रकाशितं जगत्सर्वं येन तं प्रणमाम्यहम् ।।

यः जैनमुनिः महावीराचार्यः गणितज्ञानेन जगत् प्रकाशितवान् तस्मै अहं प्रणमामि ।

## अभ्यासः

### I. एकवाक्येन उत्तरं लिखत।

१) सर्वेषु विषयेषु किं प्रमुखम् ?

उ. ..........................................................

२) महावीराचार्यः कः ?

उ. ..........................................................

३) महावीराचार्यः कस्य आस्थाने आसीत् ?

उ. ..........................................................

©KTBS Not to be republished

४) महावीराचार्यस्य प्रसिद्धस्य ग्रन्थस्य नाम किम् ?

उ. ..................................................

५) गणितसारसंग्रहग्रन्थे गणितसमस्याः केन रूपेण सन्ति ?

उ. ..................................................

६) गणितसारसंग्रह इति ग्रन्थं तेलुगुभाषायां कः अनुवादम् अकरोत् ?

उ. ..................................................

५) गणितसारसंग्रह इति ग्रन्थं आंग्लभाषायां कः अनुवादम् अकरोत्?

उ. ..................................................

**II. सप्तमीविभक्त्यन्तपदं रिक्तस्थाने पूरयत।**

१. गजः ............. वसति । (वनम्)

२. शशः ............. वसति । (बिलम्)

३. छात्रः ............. पठति । (वर्गः)

४. माता ............. पचति । (गृहम्)

५. पिता ............. कार्यं करोति । (कार्यालयः)

६. शिक्षकः ............. पाठयति । (विद्यालयः)

७. बालः ............. क्रीडति । (क्रीडांगणम्)

८. गीता ............. भाषणं करोति । (शाला)

⌘⌘⌘⌘⌘⌘

©KTBS Not to be republished

विंशः पाठः

# वीरगोपालः



पुरा भारते आंग्लसर्वकारः आसीत् । आंग्लदास्यत्वं विरुध्य भारतीयाः स्वातन्त्र्यस्य आन्दोलनम् आरब्धवन्तः । तदा आंग्लसेना भारतीयानाम् उपरि उग्ररूपेण हिंसां करोति । सर्दारभगत्सिंहस्य नाम आंग्लानां कृते सिंहस्वप्नम् आसीत् । तं ग्रहीतुं सेना सर्वत्र अटति ।

एकदा एकस्मिन् ग्रामे भगत्सिंहः भाषणं गुप्तरूपेण करोति । ग्रामप्रमुखः भगत्सिंहं रक्षितुम् एवं घोषयति - ग्रामे पुरातनः, जीर्णः बृहत् निम्बवृक्षः अस्ति । तस्य उपरि कोऽपि आरोहणं करोति । तथा सेना कुतः आगच्छति इति वदति। तदा भगत्सिंहः अन्येन मार्गेण पलायितुं शक्नोति इति । परन्तु वृक्षस्य उपरि आरोहणं बहु कष्टकरम् । कोऽपि धैर्यं न प्रदर्शयति ।



तदा गोपालः नाम द्वादशवर्षीयः वीरः बालकः अग्रे आगच्छति, वदति च - अहं भारतमातुः पुत्रः अस्मि ।

© KTBS Not to be republished

अहम् वृक्षस्य उपरि आरोहणं करोमि, तथा सूचयामि इति । सः बालकः प्रमुखस्य आज्ञां विना वृक्षस्य उपरि आरोहणं करोति । जनाः, मुख्यस्थः सर्वे मास्तु मास्तु इति वदन्ति । तथापि सः वृक्षम् आरोहति । वृक्षे मधुमक्षिकाणां नीडानि सन्ति। मधुमक्षिकाः तं दशन्ति । तथापि सः उपरि आरोहति । आंग्लसेना एतं बालकं दूरतः पश्यति । एकः सैनिकः भुषुण्डिं. चालयति। एका गोलिका बालकं ताडयति च । जनाः आगच्छतु इति आक्रोशं कुर्वन्ति। इतोऽपि सः वीरः उपरि गच्छति । उत्तरतः एका सेना, पश्चिमतः एका सेना आगच्छति । दक्षिणतः कापि सेना नास्ति इति उक्त्वा अधः पतति । वीरमरणं प्राप्नोति ।

तस्य जीवः गच्छति । भगत्सिंहः दक्षिणतः पलायनं करोति । आंग्लसेनातः रक्षणं प्राप्नोति । गोपालस्य बलिदानं सिंहसदृशस्य भगत्सिंहस्य रक्षणे श्रीरक्षा भवति।

## अभ्यासः

### I. एकवाक्येन उत्तरं लिखत।

१) गोपालं काः दशन्ति ?

उ. ..................................................

२) ग्रामस्थाः कं रक्षितुम् आलोचयन्ति ?

उ. ..................................................

३) निम्बवृक्षः कथम् अस्ति ?

उ. ..................................................

४) कः वृक्षस्य उपरि आरोहणं करोति ?

उ. ..................................................

©KTBS Not to be republished

५) सैनिकः किं चालयति ?

उ. ..........................................................

६) कुतः कापि सेना नास्ति इति गोपालःवदति ?

उ. ..........................................................

७) गोपालस्य बलिदानं कस्य रक्षणे श्रीरक्षा भवति ?

उ. ..........................................................

८) कस्य नाम सिंहस्वप्नम् आसीत् ?

उ. ..........................................................

## II. रिक्तं स्थानं पूरयत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
| | | धीराः |
| श्रेष्ठः | | |
| | | जीर्णाः |
| सेना | | |
| | मधुमक्षिके | |

©KTBS Not to be republished

## III. विरुद्धार्थकं पदं लिखत।

| | | |
|---|---|---|
| अहिंसा | x | |
| बृहत् | x | |
| वीरः | x | |
| पुरातनः | x | |
| आरोहणम् | x | |

## IV. इतरवचनद्वयं लिखत।

| | | |
|---|---|---|
| गच्छति | | |
| | | अटथ |
| चिन्तयामि | | |
| | वदावः | |
| | दशतः | |
| चालयति | | |
| | | ताडयन्ति |
| | आरोहथः | |
| सूचयामि | | |

©KTBS Not to be republished

**V. अधोलिखितानि वाक्यानि घटनाक्रमेण पुनः लिखत।**

१) ग्रामं प्रति आक्रमणं करोति ।

२) गोपालः वृक्षस्य आरोहणं करोति ।

३) तस्य जीवः गच्छति ।

४) आंग्लदास्यत्वं भारतीयाः न इच्छन्ति।

५) एकस्मिन् ग्रामे भगत्सिंहः भाषणं गुप्तरूपेण करोति।

६) पुरा भारते आंग्लसर्वकारः आसीत् ।

७) भगत्सिहंस्य रक्षणं भवति।

८) सेना कुतः आगच्छति इति वदति।

उ. ..................................................

उ. ..................................................

उ. ..................................................

उ. ..................................................

उ. ..................................................

उ. ..................................................

उ. ..................................................

उ. ..................................................

©KTBS Not to be republished

**VI. लट् लकाररूपाणि लिखत ।**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | | | |
| मध्यमः | | | |
| उत्तमः | ताडयामि | | |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | | | |
| मध्यमः | | सूचयथः | |
| उत्तमः | | | |

**भाषाभ्यासः -**

* **भागत्सिंहः - चन्द्रशेखर आजाद् इत्यादि वीरनायकानां कथाः जानीत।**

**विशेषांशाः**

**सुभाषितग्रन्थाः**

* **सुभाषितरत्नभाण्डागारः**
* **सुभाषितत्रिशती**
* **सदुक्तिकर्णामृतम्**
* **सूक्तिमुक्तावलिः**

©KTBS Not to be republished

एकविंशः पाठः

# रामभक्तः मारुतिः



मारुतिं कः न जानाति ? तस्य कथा रामायणे महाभारते च अस्ति । आञ्जनेयः, हनूमान्, वायुपुत्रः, केसरीनन्दनः इति तस्य नामान्तराणि सन्ति । अञ्जनादेवी तस्य माता, पिता च केसरी । अञ्जनागिरौ तस्य जन्म अभवत् । बाल्यात् एव मारुतिः एकः धीरः बालकः आसीत् । एकदा सः सूर्यदेवं आम्रफलम् इति मत्वा तं खादितुं प्रयत्नम् अकरोत् । सः किष्किन्धायाः महाराजस्य सुग्रीवस्य अमात्यः आसीत् । सः करुणालुः महान् स्वामिभक्तः च।



पुरा अयोध्यायां दशरथः नाम राजा आसीत्। तस्य पुत्रः श्रीरामः। एकदा राघवः वनवासं कर्तुं सीतालक्ष्मणाभ्यां सह दण्डकारण्यं प्रति गच्छति । तत्र लङ्काधिपतिः रावणः नाम राक्षसः तस्य पत्नीं जानकीम् अपहरति । दुःखितः रामः सर्वत्र वैदेहीम् अन्विषति । अन्ते सः किष्किन्धां प्रति आगच्छति । वायुपुत्रः श्रीरामं लक्ष्मणं च सुग्रीवस्य समीपम् आनयति । तत्र सुग्रीवः श्रीरामस्य सर्ववृत्तान्तं श्रुणोति । सर्वे सीतायाः अन्वेषणं कर्तुं गच्छन्ति । सर्वत्र सीताम् अन्विषन्ति, तथा च सर्वे समुद्रतीरं प्राप्नुवन्ति ।

© KTBS Not to be republished

सागरोल्लङ्घनं कृत्वा सीतान्वेषणं कर्तुं वायुपुत्रः एव समर्थः अस्ति । अतः हनूमान् समुद्रं लङ्घयति । रावणस्य लङ्कां प्राप्नोति । लङ्कायाः रक्षणार्थं लङ्किणी नाम एका राक्षसी अस्ति । सा आञ्जनेयं पश्यति तथा पीडयति, तं खादितुम् अपि आगच्छति । तदा हनूमान् युद्धे तां जयति, लङ्कां प्रविशति ।



अशोकवने भयङ्कर‍राक्षसीभिः परिवृतां सीतादेवीं पश्यति । रामस्य अङ्गुलीयकं यच्छति अहं रामदूतः मारुतिः सीतान्वेषणाय आगतः अस्मि इति स्वपरिचयं करोति । शीघ्रमेव श्रीरामः रावणं मारयति । त्वाम् अयोध्यां नयति इति तां सान्त्वयति । तदनन्तरं दशाननस्य मनसि भीतिं जनयिंतु लङ्कादहनं करोति । ततः किष्किन्धां प्रति आगच्छति सीतायाः सन्देशं कथयति च ।



श्रीरामः कपिसेनासहितः लङ्काम् आगत्य दशकण्ठस्य हननं करोति । सीतासमेतः सः अयोध्यां प्रति आगच्छति । एवं कपिवरः मारुतिः सीतारामयोः पुनः मेलने साहाय्यं करोति स्वस्वामिभक्तिं प्रकटयति च । अतः सः रामभक्तः मारुतिः इति प्रसिद्धः ।

©KTBS Not to be republished

## अभ्यासः

### I. एकवाक्येन उत्तरं लिखत।

१) मारुतिः किमिति प्रसिद्धः ?

उ. ..............................................................

२) सीतान्वेषणं कर्तुं कः समर्थः ?

उ. ..............................................................

३) किष्किन्धायाः महाराजः कः ?

उ. ..............................................................

४) वैदेहीं कः अपहरति ?

उ. ..............................................................

५) मारुतिः किमर्थं सागरोल्लङ्घनं करोति?

उ. ..............................................................

### II. रिक्तं स्थानं पूरयत ।

१) बाल्यात् एव मारुतिः एकः .................... आसीत् ।

२) आञ्जनेयस्य पिता .................... ।

३) पुरा अयोध्यायां .................... नाम राजा आसीत् ।

४) रावणः .................... अपहरति ।

५) दुःखितः श्रीरामः सर्वत्र वैदेहीम् .................... ।

©KTBS Not to be republished

## III. संयोज्य लिखत।

| अ | आ | उत्तराणि |
|---|---|---|
| १) मारुतेः माता | लङ्किणीं जयति । | ...................... |
| २) राघवः | अञ्जनादेवी । | ...................... |
| ३) हनूमान् | दशरथः | ...................... |
| ४) सीतादेवी | लङ्काधिपतिः | ...................... |
| ५) रावणः | अशोकवनम् | ...................... |

## IV. पर्यायपदं लिखत।

| | | | | | |
|---|---|---|---|---|---|
| आञ्जनेयः | = | | अरण्यम् | = | |
| समीपम् | = | | जानकी | = | |
| रामः | = | | सागरः | = | |

## V. विरुद्धार्थकं पदं लिखत।

| | | | | | |
|---|---|---|---|---|---|
| अस्ति | X | | आदिः | X | |
| समीपम् | X | | धीरः | X | |
| सुखम् | X | | | | |

## VI. अन्यलिङ्गपदं लिखत ।

| | | | | | |
|---|---|---|---|---|---|
| बालकः | - | | पिता | - | |
| एकः | - | | देवः | - | |
| सा | - | | अग्रजा | - | |

©KTBS Not to be republished

**VII. इतरवचनद्वयं लिखत।**

| | | |
|---|---|---|
| गच्छति | | |
| | आनयथः | |
| अपहरति | | |
| | | पश्यामः |
| | | कुर्वन्ति |
| | कथयतः | |

**भाषाभ्यासः -**

* **रामायणस्य कथां श्रुणुत ।**
* **श्रीरामस्य आदर्शगुणान् अवगच्छत ।**

**अवगच्छत ।**

**एकश्लोकीरामायणम्**

**पूर्वं राम तपोवनाभिगमनं हत्वा मृगं काञ्चनम् ।**
**वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।।**
**वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनम् ।**
**पश्चाद्रावणकुम्भकर्णहननं एतद्धि रामायणम् ।।**

⌘⌘⌘⌘⌘⌘

©KTBS Not to be republished

## द्वाविंशः पाठः

# उद्यानम्



एतत् उद्यानम् । इदं सुन्दरं विशालं च अस्ति । उद्याने नानाविधाः वृक्षाः, लताः, सस्यानि च सन्ति । वृक्षेषु फलानि, लतासु सस्येषु च कुसुमानि विलसन्ति । उद्याने शुद्धः वायुः वहति ।

अयम् उद्यानस्य पूर्वभागः । अत्र विविधानि सस्यानि सन्ति । सस्येषु पाटलं, जपाकुसुमं, चम्पकं, सेवन्तिकादीनि पुष्पाणि विलसन्ति। श्वेतनीलरक्तहरितपीतवर्णैः कुसुमानि चित्तमाकर्षन्ति । कुसुमेषु भ्रमराः मकरन्दं चूषन्ति ।

एषः उपवनस्य दक्षिणभागः । अत्र विविधाः वृक्षाः हरितवर्णेन सुशोभन्ते । तेषु आम्रनारिकेलपूगपनसकदलीवटादयः पादपाः जनेभ्यः छायां यच्छन्ति । जनाः पादपानां छायासु विश्रान्तिम् अनुभवन्ति । वृक्षेषु काकाः, कपोताः, शुकाः, कोकिलाः, चटकाः च कलरवं कुर्वन्ति ।

इदानीं वाटिकायाः पश्चिमभागं पश्यामः । अत्र जलाशयः अस्ति। जलचराः जलाशये वसन्ति । मण्डूकाः, मीनाः, बकाः, हंसाः, कूर्माः च

©KTBS Not to be republished

सलिले इतस्ततः सञ्चरन्ति । कासारे कमलानि विकसन्ति । तेषु भ्रमराः गुञ्जन्ति ।

अयं वाटिकायाः उत्तरभागः अयं क्रीडावलयः अत्र शिशवः, बालकाः, बालिकाः च आनन्देन क्रीडन्ति । वृद्धाः, तरुणाः च अत्र व्यायामं कुर्वन्ति, देहारोग्यं प्राप्नुवन्ति च ।

केषुचित् उद्यानेषु वन्यान् मृगान् पञ्जरेषु पालयन्ति । मर्कटान्, सर्पान्, भल्लूकान्, अश्वान्, हरिणान् अपि प्रदर्शयन्ति । उद्याने अटनेन सर्वेषां जामिता नश्यति, चित्तं च प्रसन्नं भवति ।

## अभ्यासः

### I. एकवाक्येन उत्तरं लिखत।

१) उद्यानं कथम् अस्ति ?

उ. ........ ...............................................

२) उद्यानस्य त्रयाणां पुष्पाणां नामानि लिखत ?

उ. ......... ...............................................

३) व्यायामस्य प्रयोजनं किम् ?

उ. ......... ...............................................

४) उद्याने अटनेन किं भवति ?

उ. ...... ...............................................

५) वृक्षेषु के कलरवं कुर्वन्ति ?

उ. ...... ...............................................

©KTBS Not to be republished

**II. रिक्तं स्थानं पूरयत।**

१) कमलेषु.................गुञ्जन्ति।

२) वृक्षाः .............. यच्छन्ति।

३) सस्येषु ............ विलसन्ति।

४) भ्रमराः ................. चूषन्ति।

५) सरोवरे ............... विकसन्ति।

**III. आम् / न लिखत ।**

१) उद्याने शुद्धः वायुः वहति।

२) नारिकेलः एकं पुष्पम् ।

३) जनाः लतानां छायासु विश्रान्तिं स्वीकुर्वन्ति।

४) उद्यानं सर्वेषां कृते सन्तोषं ददाति।

५) वन्यान् मृगान् पञ्जरेषु प्रदर्शयन्ति।

**IV. जलचर- वृक्ष-खग-पुष्परूपेण विभागं कुरुत।**

| |
|---|
| काकः , पाटलं, बकः, हंसः, कोकिलः, वटः, कूर्मः, शुकः, भ्रमरः, चम्पकं, मल्लिका, आम्रः |

जलचरः =

वृक्षः =

खगः =

पुष्पम् =

©KTBS Not to be republished

## V. पर्यापदानि चित्वा लिखत।

| | |
|---|---|
| पुष्पम्, वृक्षः, जलाशयः, उद्यानम्, जलम्, कमलम् | पद्मम्, वाटिका, कुसुमम् कासारः, उपवनम्, सलिलम् पादपः |

## VI . वर्णस्य अनुसारं विभागं कुरुत।

आकाशः, शुकः, कोकिलः मल्लिका, पर्णम्,

काकः, क्षीरम्, समुद्रः, चन्द्रः,

| श्वेतः | नीलः | हरितः | कृष्ण; |
|---|---|---|---|
| | | | |
| | | | |
| | | | |

## VII. उदाहरणानुसारम् उत्तरं लिखत।

उदा → षष्ठीविभक्तिः, एकवचनम् = रामस्य (राम)

1) तृतीयाविभक्तिः, एकवचनम् = .......... (वाटिका)

2) सप्तमीविभक्तिः, एकवचनम् = .......... (भ्रमरः)

3) द्वितीयाविभक्तिः, बहुवचनम् = .............. (शुकः)

4) चतुर्थीविभक्तिः, बहुवचनम् = .............. (उद्यानम्)

5) पञ्चमीविभक्तिः, एकवचनम् = .......... (वृक्षः)

©KTBS Not to be republished

**VIII. कार्यं के कुर्वन्ति ?**

| | | |
|---|---|---|
| उदा - कलरवं कुर्वन्ति | → | पक्षिणः |
| छायां यच्छन्ति | → | |
| उद्याने अटन्ति | → | |
| मकरन्दं चूषन्ति | → | |
| जले वसन्ति | → | |

**IX. वाक्यं रचयत।**

१) सुन्दरम् : ........................................

२) शुद्धम् : ........................................

३) आरोग्यम् : ........................................

४) क्रीडा : ........................................

**X. चतुर्थपदं लिखत।**

१) उद्यानम् - नपुंसकलिङ्गः :: वाटिका - ............ ।

२) विलसन्ति - प्रथमपुरुषः :: पश्यामः - ............ ।

३) भ्रमराः - गुञ्जन्ति :: कमलानि - ............ ।

४) वृक्षस्य - षष्ठी विभक्तिः :: छायाम् - ............ ।

**भाषाभ्यासः -** ✲ विविधवृक्षाणां - पुष्पाणां नामानि जानीत।

✲✲✲✲✲

©KTBS Not to be republished

त्रयोविंशः पाठ

# विश्वामित्रः



©KTBS Not to be republished

कुशिकवंशे गाधिराजः इति सुप्रसिद्धः महाराजः आसीत्। तस्य पुत्रः कौशिकः। सः एकदा सैन्येन सह भूप्रदक्षिणं करोति। यात्रासमये सः ब्रह्मर्षेः वसिष्ठस्य आश्रमं गच्छति। कौशिकः वसिष्ठं प्रणमति। वसिष्ठः कौशिकस्य समग्रपरिवारस्य आतिथ्यं करोति। तदर्थं शबला नाम धेनुः स्वादु भोजनं सिद्धं करोति। सर्वे भोजनं खादन्ति, सन्तुष्टाः भवन्ति च।

कौशिकः आश्रमस्य धेनुं ददातु इति वसिष्ठं प्रार्थयति। वसिष्ठः निराकरोति। कौशिकः बलात् धेनुं स्वीकर्तुं बहु प्रयत्नं करोति। परन्तु तस्य प्रयत्नः व्यर्थः भवति। सः राज्यं त्यजति। हिमालयं गच्छति। तपसा विविधानि अस्त्राणि प्राप्नोति।

सः दर्पेण पुनः वसिष्ठस्य आश्रमम् आगच्छति। आश्रमस्य उपरि आक्रमणं



करोति। आश्रमवासिनः भीताः भवन्ति। परन्तु वसिष्ठः प्रशान्तः भवति। सः ब्रह्मदण्डं गृहीत्वा आश्रमस्य मध्यभागे तिष्ठति। कौशिकस्य प्रयत्नः विफलः भवति।

अन्ते सः ब्रह्मास्त्रस्य प्रयोगम् अपि करोति। परन्तु ब्रह्मदण्डस्य अग्रे तत् अस्त्रम् अपि शान्तं भवति।



©KTBS Not to be republished

तदा कौशिकस्य विवेकः जागृतः भवति। तस्य अहङ्कारः नष्टः भवति। तदा सः चिन्तयति - ''वसिष्ठस्य समीपे ब्रह्मबलम् अस्ति। तस्य अग्रे शस्त्रबलं व्यर्थम्'' इति।

अतः सः पुनः उग्रं तपः आचरति ब्रह्मर्षिः भवति च। तदारभ्य कौशिकः विश्वामित्रः इति प्रसिद्धः ।

## अभ्यासः

**I. एकवाक्येन उत्तरं लिखत।**

१) गाधिराजः कस्मिन् वंशे आसीत् ?

उ...........................................................

२) गाधिराजस्य पुत्रः कः ?

उ...........................................................

३) कौशिकः कस्य आश्रमम् गच्छति ?

उ...........................................................

४) आश्रमस्य धेनोः नाम किम् ?

उ...........................................................

५) कौशिकः कुत्र तपः करोति ?

उ...........................................................

६) वसिष्ठस्य समीपे किम् आसीत् ?

उ...........................................................

©KTBS Not to be republished

## II. रिक्तं स्थानं पूरयत।

१) कौशिकः सैन्येन सह ............... करोति।

२) वसिष्ठः...................... गृहीत्वा तिष्ठति।

३) कौशिकस्य ........................नष्टः।

४) कौशिकः.........................इति प्रसिद्धः ।

५) ब्रह्मबलस्य अग्रे......................व्यर्थम्।

## III. आम् / न इति लिखत।

१) कौशिकः भूप्रदक्षिणं करोति।

उ. ..................................................

२) वसिष्ठः कौशिकस्य आतिथ्यं न करोति।

उ. ..................................................

३) कौशिकस्य प्रयत्नः व्यर्थः न भवति ।

उ. ..................................................

४) सः विनयेन पुनः वसिष्ठस्य आश्रमं गच्छति।

उ. ..................................................

©KTBS Not to be republished

**IV. पर्यायपदं लिकत।**

पुत्रः = अहङ्कारः =

धेनुः = समीपम् =

**V. विरुद्धार्थकपदं लिखत।**

प्रसिद्धः X

उपरि X

विवेकः X

अस्ति X

©KTBS Not to be republished

**अवगच्छत ।**

**एकश्लोकीभागवतम्**

**आदौ देवकिदेविगर्भजननं गोपीगृहे वर्धनम्**
**मायापूतनिजीवितापहरणं गोवर्धनोद्धारणम्**
**कंसच्छेदनकौरवादिहननं कुन्तीसुताः पालनम्**
**एतद्भागवतं पुराणपुण्यकथनं श्रीकृष्णलीलामृतम् ।।**

# चतुर्विंशः पाठः

## सप्तककाराः




✻ तव नाम **किम्**?

मम नाम ............... ।

✻ देवालये **कति** अर्चकाः सन्ति ?

देवालये **पञ्च** अर्चकाः सन्ति।

✻ चन्द्रः **कुत्र** राजते?

चन्द्रः आकाशे राजते।

✻ छात्रः **कदा** शालां गच्छति?

छात्रः सार्धनववादने शालां गच्छति।

✻ बालिका **कथम्** गायति?

बालिका मधुरं गायति।

✻ छात्रा **किमर्थं** शालां गछाति?

छात्रा पठनार्थं शालां गछाति।

✻ पर्णं **कुतः** पतति?

पर्णं वृक्षात् पतति।

©KTBS Not to be republished

# अभ्यासः

**प्रश्नवाक्यानि लिखत।**

उदा - बालकः **क्षीरं** पिबति। उ. बालकः किं पिबति?

१) सः **पुस्तकं** पठति। उ. ....................?

२) स्यूते **षट्** पुष्पाणि सन्ति। उ. ....................?

३) छात्राः **क्रीडाङ्गणे** कीडन्ति। उ. ....................?

४) कृषकः **ग्रामे** वसति। उ. ....................?

५) बालिका **षड्वादने** उत्तिष्ठति। उ. ....................?

६) शिशोः नाम **कोमला**। उ. ....................?

७) फलं **वृक्षे** अस्ति। उ. ....................?

८) नक्षत्राणि **आकाशे** सन्ति। उ. ....................?

९) सः **ग्रन्थालयात्** पुस्तकं नयति। उ. ....................?

१०) मीनः **जले** वसति। उ. ....................?

११) भोजनं **रुचिकरं** अस्ति। उ. ....................?

१२) छात्रः **पठनार्थं** शालां गच्छति। उ. ....................?

१३) गृहे **सप्त** जनाः सन्ति। उ. ....................?

१४) पिता **अष्टवादने** कार्यालयं गच्छति। उ. ....................?

१५) रामः **चित्रकूटे** वसति। उ. ....................?

©KTBS Not to be republished

पञ्चविंशः पाठः

# देशभक्तिगीतम्



अङ्गवङ्गसिन्धुराष्ट्रकूटकोटिसंयुतां
देवसिन्धुनर्मदादिसिन्धुसङ्घशोभिताम्।
शैलराजविन्ध्यसह्यशैलपङ्क्तिरक्षितां
पुण्यभूमिमादरान्नमामि भारताम्बिकाम् ।।1।।

रामदासरामकृष्णबुद्धदेवमातरं
विक्रमार्कभोजराजराजराजपालिताम्।
भासकालिदासभट्टिबाणभारविप्रसूं
पुण्यभूमिमादरान्नमामि भारताम्बिकाम् ।।2।।

©KTBS Not to be republished

योगिवर्यशङ्करार्यधर्ममार्गदर्शिनीं
पूजनीयमालवीयगान्धिनेहरुसेविताम्।।
श्रीरवीन्द्रदिव्यकाव्यलब्धकीर्तिसन्ततिं
पुण्यभूमिमादरान्नमामि भारताम्बिकाम् ।।3।।

सत्यसत्त्वशालिनीं सुधर्ममार्गदर्शिनीं
भुक्तिमुक्तिदायिनीं विरक्तिबुद्धिवर्धिनीं।
पापसङ्घनाशिनीं परात्परां पुरातनीं
पुण्यभूमिमादरान्नमामि भारताम्बिकाम् ।।4।।

- डा. के. यस्. नागराजन् (दि)

**अवगच्छत ।**

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।**

© KTBS Not to be republished

## शब्दकोषः

अजः - ಆಡು - Goat
अविः - ಮೇಕೆ – Sheep
अर्कः - ಸೂರ್ಯ– Sun
अर्भकः - ಶಿಶು – Child
अङ्गुली - ಬೆರಳು – Finger
अङ्गुलीयकम् - ಉಂಗುರ – Fingerring
अन्वेषणम् - ಹುಡುಕು – Search
अभ्यङ्गस्नानम् - ಎಣ್ಣೆಸ್ನಾನ – Oilbath
आखुः - ಇಲಿ – Rat
आपः - ನೀರು – Water
आपणः- ಅಂಗಡಿ – Shop
इषुः - ಬಾಣ – Arrow
इनः- ಸೂರ್ಯ – Sun
इभः- ಆನೆ – Elephant
इक्षुः - ಕಬ್ಬು – Sugarcane
ईहामृगः- ತೋಳ – Wolf
उरगः - ಹಾವು – Snake
उपदंशः -ಉಪ್ಪಿನಕಾಯಿ – Pickle
उत्खननम् - ಅಗೆತ – Digging

ऊर्णम् - ಉಣ್ಣೆ – Lenin / Wool
ऊषरः - ಮರುಭೂಮಿ – Desert
ऋक्षः - ಕರಡಿ – Bear
एणः - ಕೃಷ್ಣಮೃಗ– Black antelope
एडकः - ಕುರಿ – Sheep
एला - ಏಲಕ್ಕಿ – Cardamom
ऐगारिकः - ಕಳ್ಳ Thief
ओकः - ಮನೆ – House
ओतुः - ಬೆಕ್ಕು – Cat
औदारिकः- ಹೊಟ್ಟೆಬಾಕ – Glutter
अंसः- ಭುಜ, ಹೆಗಲು – Shoulder
कुञ्चिका- ಕೀಲಿ – Key
कूर्मः - ಆಮೆ – Tortoise
कपोलः - ಕೆನ್ನೆ – Cheek
कूर्परः- ಮೊಣಕೈ – Elbow
गुडः- ಬೆಲ್ಲ – Jaggery
गोलिका- ಗುಂಡು – Bullet
घासः- ಹುಲ್ಲು – Grass
घूकः- ಗೂಬೆ – Owl

©KTBS Not to be republished

उड्डयनम् - ಹಾರುವುದು – Take off (fly)

उपायनम्- ಉಡುಗೊರೆ – Gift

ऊरु: - ತೊಡೆ – Thai

ऊर्मि: - ಅಲೆ – Wave

जपाकुसुमम्- ದಾಸವಾಳ - Hibiscus

झम्पाक: - ವಾನರ – Ape

झंझावात: - ಬಿರುಗಾಳಿ– Storm

टङ्किका - ಬೆರಳಚ್ಚುಯಂತ್ರ – Typewriter

ठक्कुर: - ವಿಗ್ರಹ – Idol

डिम्भ: - ಭ್ರೂಣ – Embryo

डुलि: - ಆಮೆ – Tortoise

तन्द्रा- ತೂಕಡಿಕೆ – Drowsiness

निर्झर: - ಜಲಪಾತ – Waterfall

निम्बवृक्ष - ಬೇವಿನಮರ – Neemtree

नीडम्- ಗೂಡು – Nest

पीलुक: - ಇರುವೆ – Ant

प्रक्षालनम्- ತೊಳೆಯುವುದು

चेत: - ಮನಸ್ಸು – Intelect

चटक:- ಗುಬ್ಬಚ್ಚಿ – Sparrow

छाग: - ಆಡು – Goat

जानु- ಮಂಡಿ – Knee

जलाशय: - ಕೊಳ – Pond

मृत्तिका - ಮಣ್ಣು – Clay

मार्जनम् - ಸ್ವಚ್ಛಗೊಳಿಸುವುದು – Cleaning

मधुमक्षिका - ಜೇನುನೊಣ – Honeybee

मण्डूक: - ಕಪ್ಪೆ– Frog

मणिबन्ध: - ಮಣಿಕಟ್ಟು – Wrist

रसना - ನಾಲಗೆ – Tongue

लशुनम् - ಬೆಳ್ಳುಳ್ಳಿ Garlic

लोहित: - ಕೆಂಪು – Red

ललाटम् - ಹಣೆ – Forehead

वल्लभ: - ಪತಿ – Husband

वक्ष:स्थलम्- ಎದೆ – chest

शफर: - ಮೀನು – Fish

©KTBS Not to be republished

(ಶುದ್ಧೀಕರಿಸು) – Washing

पाषाणखण्डः- ಕಲ್ಲಿನ ಚೂರು – Stonepiece

पाटलम् - ಗುಲಾಬಿ – Rose

पिकः - ಕೋಗಿಲೆ – Cuckoo

फेरुः - ನರಿ – Fox

बधिरः -ಕಿವುಡ – Deaf

बिडालः - ಬೆಕ್ಕು – Cat

भुषुण्डिः - ಬಂದೂಕು – Gun

भल्लूकः - ಕರಡಿ – Bear

शुनकः - ನಾಯಿ – Dog

सद्म- ಮನೆ – Home

स्कन्धः- ಹೆಗಲು – Shoulder

हालिकः-ರೈತ – Agriculturist

व्रीहिः -ಭತ್ತ – Paddy

माषः -ಉದ್ದಿನಕಾಳು – Black gram

गोधूमः -ಗೋಧಿ – Wheet

तिलम् -ಎಳ್ಳು – Sesame

चणकम् -ಕಡಲೆ– Chickpea

मुद्गः -ಹೆಸರುಕಾಳು– Green gram

आढकम् -ನವಣೆ – Navane

निष्पावः - ಸಜ್ಜೆ – Bajra

कुळित्थः-ಹುರಳಿಕಾಳು– Horse gram

आढकः ತೊಗರಿ – Toordall

निष्पावः ಅವರೆ – Belardall

©KTBS Not to be republished

## षाण्मासिकीपाठयोजना

| मासाः | पाठाः |
|---|---|
| **प्रथमषाण्मासिकम्** | |
| जून् | सम्भाषणशिबिरम् (पञ्चदशदिनानि) प्रार्थना, वर्णमाला, गुणिताक्षरम् संयुक्ताक्षरम् |
| जुलै | चतुर्थः, पाठः, पञ्चमः पाठः, षष्ठः पाठः , सप्तमः पाठः, अष्टमः पाठः, क्रियापदम् |
| अगस्ट् | नवमः पाठः, दशमःपाठः, एकादशः पाठः,द्वादशः पाठः, |
| सप्टम्बर् | शिशुगीतम्, त्रयोदशः पाठः परीक्षा |
| **द्वितीयषाण्मासिकम्** | |
| अक्टोबर् | चैत्रोत्सवः, द्वादशमासाः, षड्ऋतवः, अहो काकस्य मूर्खता |
| नवम्बर् | त्यागमूर्तिः रन्तिदेवः, सुभाषितानि, सङ्ख्याः, समयः |
| डिसंबर् | महावीराचार्यः, वीरगोपालः |
| जनवरि | रामभक्तः मारुतिः, उद्यानम्, |
| फेब्रवरि | विश्वामित्रः, सप्तककाराः, |
| मार्च् | देशभक्तिगीतम्, पुनरावर्तनम्, परीक्षा |

©KTBS Not to be republished